Downloaded From : http://www.cbseportal.com

# कक्षा – द्वादशी
## संस्कृतम् (केन्द्रिकम्) - (322)
## आदर्शप्रश्नपत्रम् – 2018-19

**समयः – होरात्रयम्** **पूर्णाङ्काः 100**

**निर्देशाः -**

अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति -

| | |
|---|---|
| खण्डः (क) अपठितांशावबोधनम् | - 10 अङ्काः |
| खण्डः (ख) रचनात्मककार्यम् | - 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्तव्याकरणम् | - 30 अङ्काः |
| खण्डः (घ) I. पठितांशावबोधनम् | - 35 अङ्काः |
| II. संस्कृत-साहित्येतिहास-परिचयः | - 10 अङ्काः |

## भाग – क
## अपठितांशावबोधनम्

**1.** **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत -** 10

मानवमात्रस्य जीवनं सार्थकीकर्तुं शिक्षायाः महती भूमिका भवति । शिक्षां विना मनुष्यः पशुतुल्यः भवति । शिक्षया एव मानवस्य ज्ञानचक्षुः उन्मीलनं भवति, सः उचितानुचितज्ञानं प्राप्नोति, कर्तव्याकर्तव्यविवेकं च लभते । अत एव समाजेन सह सर्वकारेणापि शिक्षायाः उपरि विशिष्टम् अवधानं दीयते । "शिक्षायाः अधिकारः (Right to Education) मौलिकाधिकाररूपेण घोषितः अस्ति । सर्वेऽपि बालकाः बालिकाश्च विद्यालयं नेतव्याः तत्र च तेभ्यः शिक्षा प्रदातव्या । विद्यालयं गत्वा छात्राः न केवलं पुस्तकीयं ज्ञानं लभन्ते, अपि तु व्यावहारिकजीवने तस्य ज्ञानस्य कथम् उपयोगः विधेयः इत्यपि जानन्ति । अत एव अस्माभिः सर्वैः एव मिलित्वा प्रयतितव्यम् यत् कोऽपि बालकः काऽपि बालिका वा शिक्षायाः प्रकाशात् वञ्चिता न भवेत् ।

**प्रश्नाः**

**अ. एकपदेन उत्तरत - (केवलं प्रश्नचतुष्टयम्)** ½ × 4=2

(i) शिक्षां विना मनुष्यः कीदृशः भवति?

(ii) कः मौलिकाधिकाररूपेण घोषितः?

(iii) कया मानवस्य ज्ञानचक्षुः उन्मीलनं भवति?

(iv) सर्वकारेण शिक्षायाः उपरि किं दीयते?

(v) कस्य जीवनं सार्थकीकर्तुं शिक्षायाः महती भूमिका भवति?



Downloaded From : http://www.cbseportal.com Courtesy : CBSE

Downloaded From : http://www.cbseportal.com

| | | |
|---|---|---|
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) छात्राः विद्यालयं गत्वा किं जानन्ति?<br>(ii) सर्वैः कथं प्रयतितव्यम्?<br>(iii) शिक्षया मानवः किं लभते? | 2×2=4 |
| | **इ. यथानिर्देशम् प्रश्नान् उत्तरत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) "सः उचितानुचितं ज्ञानं प्राप्नोति" इत्यस्मिन् वाक्ये 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>(ii) "तत्र च तेभ्यः शिक्षा प्रदातव्या" इत्यस्मिन् वाक्ये किं क्रियापदम्?<br>(iii) "पुस्तकीयं ज्ञानम्" इत्यनयोः पदयोः किं विशेषणपदम्?<br>(iv) "उद्घाटनम्" इति पदस्य समानार्थकपदं गद्यांशात् चित्वा लिखत ।<br>(v) "सैद्धान्तिकम्" इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत । | ½×4=2 |
| | **ई अनुच्छेदस्यास्य कृते समुचितं शीर्षकं लिखत ।** | 2 |
| | | |
| | **खण्डः - ख**<br>**रचनात्मककार्यम्** 15 अङ्काः | |
| | | |
| **2.** | **एकादशकक्षायां पठनार्थं के विषयाः गृहीताः इति विषयिणीं जिज्ञासां शमयितुं मित्रं प्रति लिखिते पत्रे मञ्जूषातः पदानि गृहीत्वा रिक्तस्थानानि प्रपूर्य पत्रं पुनः लिखत -**<br><br>प्रियमित्र अभिनव !<br>सप्रेम नमः ।<br><br>भवतः (i) ..................... प्राप्तम् । भवता पृष्टं यत् मया एकादशकक्षायां पठनार्थं के के विषयाः (ii).................... ? मित्र ! बाल्यकालादेव मम (iii) .................. कलासङ्काये विद्यते । तत्रापि (iv) ................ मह्यम् अतीव रोचते । अत एव भाषाद्वयं मया...................., हिन्दी (vi) .............. च । एतदतिरिक्तं राजनीतिशास्त्रम् इतिहासं (vii)................. च वैकल्पिकविषयरूपेण गृहीतं मया । भवतः रुचिः (viii) ................ आसीत् । भवान् तत्र (ix)............... गृहीतवान् जीवविज्ञानं वा ? पत्रोत्तरेण स्वविषये सूचयतु । (x) ....................... चरणयोः मे प्रणतिः निवेदनीया ।<br><br>भवतः मित्रम्<br>सुधांशुः<br><br>**मञ्जूषा -** पित्रोः, पत्रम्, गणितम्, अभिरुचिः, भाषा, गृहीताः, संस्कृतम्, विज्ञानसंकाये, स्वीकृतम्, मनोविज्ञानम् । | ½×10=5 |



Downloaded From : http://www.cbseportal.com Courtesy : CBSE

Downloaded From : http://www.cbseportal.com

| | | |
|---|---|---|
| 3. | **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -**<br>एकस्य (i) ........................ एकः विश्वासपात्रं सेवकः वानरः आसीत् । सः (ii) ................................. राज्ञः सेवां करोति स्म । एकदा राजा (iii) ................................. आसीत् । वानरः (iv) ................................. निवारयितुं (v) ................................. चालयति स्म । परम् एका मक्षिका (vi) ................................. सुप्तस्य भूपतेः उद्वेगं (vii) ................................. स्म । एतद् दृष्ट्वा वानरः (viii) ................................. अभवत् । सः च खड्गेन (ix) ................................. उपरि प्रहारं कृतवान् । मक्षिका उड्डीय दूरं गता, परं खड्गप्रहारेण राजा मृतः । अत एव कथ्यते (x) ................................. विद्वान् शत्रुः वरम् ।<br>**मञ्जूषा -**<br>मूर्खमित्रात्, मक्षिकायाः, जनयति, भूपतेः क्रुद्धः, अहर्निशम्, ऊष्माणम् , सुप्तः, मुहुर्मुहुः, व्यजनम् । | ½×10=5 |
| 4. | **"स्वच्छता" अथवा "वृक्षारोपणम्" इति विषयमधिकृत्य पञ्चवाक्यमितम् अनुच्छेदं लिखत**<br>**(मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् गृहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतन्त्ररूपेण लेखितव्यम् ।)**<br>**मञ्जूषा-** जीवने, आवश्यकी, सर्वत्र, स्वास्थ्याय, स्वच्छता, अवकरकण्डोलः, क्षेपणीयाः, जागरूकता, अवकराः, प्रसारणीया<br>**अथवा**<br>**मञ्जूषा-** प्रकृतिसुरक्षा, पर्यावरण-सन्तुलनम्, प्रदूषणम्, प्रकृतेः, शोभा, हरितिमा, वृष्टिः, शङ्कुमः, छात्राणाम्, भूमिका | 1×5=5 |
| | **खण्डः - ग**<br>**अनुप्रयुक्तव्याकरणम्      30 अङ्काः** | |
| 5. | **अधोलिखितवाक्येषु रेखांकितपदानां सन्धिं सन्धिच्छेदं वा कुरुत -      (केवलं प्रश्नषट्कम्)**<br>(i) <u>हितान्न</u> यः संश्रृणुते स किं प्रभुः ।<br>(ii) <u>सदानुकूलेषु</u> हि कुर्वते रतिम् ।<br>(iii) तथा चतुर्भिः कनकं परीक्षते <u>निर्घषणच्छेदन</u>-तापताडनैः ।<br>(iv) अहो राजते <u>कीदृशीयं</u> हिमानी ।<br>(v) <u>लोभश्चेद्</u> अगुणेन किम् ?<br>(vi) <u>अशक्तैर्बलिनः</u> शत्रोः कर्तव्यं प्रपलायनम् ।<br>(vii) तत्कथं कौमुदी-<u>महोत्सवः</u> न प्रतिषिद्धः। | 1×6=6 |



Downloaded From : http://www.cbseportal.com Courtesy : CBSE

Downloaded From : http://www.cbseportal.com

| | | |
|---|---|---|
| 6. | **निम्नलिखितवाक्येषु रेखाङ्कित-समस्तपदानां विग्रहं कुरुत - (केवलं प्रश्नषटकम्)**<br>(i) सर्वे <u>**यथास्थानम्**</u> उपविशन्ति ।<br>(ii) ते <u>**मूढधियः**</u> पराभवं व्रजन्ति ।<br>(iii) सूर्यः एव <u>**अहोरात्रं**</u> जनयति ।<br>(iv) दारिद्र्यं हि नाम पुरुषस्य <u>**सोच्छ्वासं**</u> मरणम् ।<br>(v) <u>**सर्वसम्पदः**</u> रतिं कुर्वते ।<br>(vi) शिक्षा क्षयं याति <u>**कालपर्ययात्**</u> ।<br>(vii) कालिदासः <u>**महाकविः**</u> आसीत् । | 1×6=6 |
| | | |
| 7. | **अधोलिखितवाक्येषु कोष्ठकान्तर्गतौ प्रकृतिप्रत्ययौ योजयित्वा रिक्तस्थानपूर्तिं कुरुत - (केवलं प्रश्नाष्टकम्)**<br>(i) ततः प्रभाते अत्र ........................... (आ+गम्+तव्यत्)<br>(ii) सत्येन पन्थाः ........................... देवयानः । (वि+तन्+क्त)<br>(iii) एतत् सरः ........................... नीतम् । (निर्मत्स्य+तल्)<br>(iv) बालुका ........................... भूमिम् आवृणोति । (उत्+डी+ल्यप्)<br>(v) तर्हि ........................... वयम् आहूताः (उप+आ+लभ्+तुमुन्)<br>(vi) भवद्भ्यां सम्यक् न ........................... । (मन्त्र+क्त)<br>(vii) ........................... सर्वत्र पूज्यते। (गुण+वतुप्)<br>(viii) अभियानं ........................... आसीत् । (साहस+ठक्)<br>(ix) शीलं सर्वत्र ........................... भवति । (वन्द्+अनीयर्) | 1×8=8 |
| | | |
| 8. | **अधोलिखितवाक्येषु कर्तृक्रियापदयोः अन्विर्ति कुरुत -**<br>(i) शठाः तथाविधान् ........................... । (हन्ति/घ्नन्ति)<br>(ii) सत्यमेव ........................... । (जयति/जयन्ति)<br>(iii) अस्माभिः ह्रदः ........................... । (अन्वेषितम्/अन्वेषितः)<br>(iv) आर्य! चन्द्रगुप्तः ........................... । (प्रणमन्ति/प्रणमति)<br>(v) कनकं चतुर्भिः ........................... । (परीक्ष्यते/परीक्ष्येते)<br>**अथवा**<br>**मञ्जूषाप्रदत्तविशेषणपदैः रिक्तस्थानपूर्तिं कुरुत –**<br>(i) एवं ........................... भोजनानां दात्री भव ।<br>(ii) तत् ........................... अशनम् अशितव्यं भविष्यति ।<br>(iii) कुत्र नु खलु ........................... जनं लभेय ।<br>(iv) समिद्भिः ........................... छदिप्रान्तः ।<br>(v) तत्र ........................... शल्यकार्यं वर्णितम् ।<br>**मञ्जूषा-** अष्टविधम्, योग्यम्, शोभनानाम्, अतिनमितः, सम्पन्नम् । | 1×5=5 |
| | | |



Downloaded From : http://www.cbseportal.com Courtesy : CBSE

Downloaded From : http://www.cbseportal.com

| | | |
|---|---|---|
| **9.** | **कोष्ठकप्रदत्तपदैः सह समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत – (केवलं प्रश्नपञ्चकम्)**<br>(i) तदलं भवतः .......................... । (सन्ताप)<br>(ii) .......................... अधः जलं भवति । (भूमि)<br>(iii) कथं स्पर्धते .......................... सह दुरात्मा राक्षसः । (अस्मद्)<br>(iv) .......................... अध्यास्ते वृषलः । (सिंहासन)<br>(v) सद्विद्या यदि किं .......................... । (धन)<br>(vi) नमः .......................... । (सभा) | 1×5=5 |
| | | |
| **खण्डः – घ भाग - I**<br>**पठितांशावबोधनम्  35 अङ्काः** | | |
| | | |
| **10.** | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**<br>तदहं न गच्छामि । भवद्भ्यां यत् प्रतिभाति, तत् कर्त्तव्यम् । अथ तस्य निश्चयं ज्ञात्वा अनागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ सह परिजनेन । अथ प्रभाते तैः मत्स्यजीविभिः जालैस्तं जलाशयम् आलोड्य यद्भविष्येण सह तत् सरो निर्मत्स्यतां नीतम् ।<br>**प्रश्नाः**<br>**I. एकपदेन उत्तरत -**<br>(i) मत्स्यजीविनः कदा जलाशयम् आलोडितवन्तः ?<br>(ii) मत्स्यजीविभिः किं निर्मत्स्यतां नीतम् ?<br>**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्)**<br>(i) कौ परिजनेन सह निष्क्रान्तौ?<br>(ii) प्रभाते तैः किं कृतम्?<br>**III. यथानिर्देशम् उत्तरत -**<br>(i) 'तड़ागः' इत्यस्य समानार्थकपदं गद्यांशात् चित्वा लिखत ।<br>(ii) 'सायम्' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत ।<br>(iii) 'तदहं न गच्छामि' इत्यस्मिन् वाक्ये 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>(iv) 'भवद्भ्यां यत् प्रतिभाति' इत्यस्मिन् वाक्ये किं क्रियापदम्?<br>(v) 'गच्छामि' इति क्रियापदस्य कर्तृपदं किम्? | 5<br><br>½×2=1<br><br>2×1=2<br><br>½×4=2 |
| | | |
| **11.** | **अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**<br>**अनन्तरत्नप्रभवस्य यस्य , हिमं न सौभाग्यविलोपि जातम् ।**<br>**एको हि दोषो गुणसन्निपाते, निमज्जतीन्दोः किरणेष्विवाङ्कः ॥**<br>**प्रश्नाः**<br>**I. एकपदेन उत्तरत -** | 5<br><br>½×2=1 |



Downloaded From : http://www.cbseportal.com Courtesy : CBSE

Downloaded From : http://www.cbseportal.com

| | | |
|---|---|---|
| | (i) किं सौभाग्यविलोपि न जातम् ?<br>(ii) गुणसन्निपाते कः निमज्जति ?<br><br>**II. पूर्णवाक्येन उत्तरत -**<br>(i) गुणसन्निपाते दोषः कः इव निमज्जति?<br><br>**III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) 'निमज्जति इति क्रियापदस्य कर्तृपदं किम्?<br>(ii) 'अनन्तरत्नप्रभवस्य यस्य - इत्यस्मिन् श्लोकांशे 'यस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>(iii) 'चन्द्रस्य' कृते श्लोके किं समानार्थकपदं प्रयुक्तम्?<br>(iv) 'दुर्भाग्यः' इत्यस्य विलोमपदं श्लोकात् चित्वा लिखत ।<br>(v) 'एको हि दोषो' अत्र किं विशेषणपदम्? | 2×1=2<br><br>½×4=2 |
| | | |
| **12.** | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**<br>कञ्चुकी – देव ! कः अन्यः जीवितुकामः देवस्य शासनम् अतिवर्तेत ?<br>राजा - (नाट्येन उपविश्य) आर्य ! आचार्यचाणक्यं द्रष्टुम् इच्छामि ।<br>कञ्चुकी - यथा आज्ञापयति देवः । (इति निष्क्रान्तः) (ततः प्रविशति आसनस्थः स्वभवनगतः चिन्तां नाटयन् चाणक्यः ।)<br>चाणक्यः - (आकाशे लक्ष्यं बद्ध्वा) – कथं स्पर्धते मया सह दुरात्मा राक्षसः ? राक्षस ! राक्षस ! विरम, विरम अस्माद् दुर्व्यसनात् ।<br>**I. एकपदेन उत्तरत -**<br>(i) कः चाणक्यं द्रष्टुम् इच्छति ?<br>(ii) चाणक्यः कुत्र लक्ष्यं बध्नाति ?<br><br>**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्)**<br>(i) चाणक्यः कथं प्रविशति?<br>(ii) कञ्चुकी किम् उक्त्वा निष्क्रान्तः?<br><br>**III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) अन्यः जीवितुकामः देवस्य शासनम् अतिवर्तेत? इत्यस्मिन् वाक्ये किं क्रियापदम् ?<br>(ii) 'दुरात्मा राक्षसः' इत्यनयोः पदयोः किं विशेषणपदम्?<br>(iii) 'प्रविष्टः' इति क्रियापदस्य किं विलोमपदं नाट्यांशे प्रयुक्तम्?<br>(iv) 'गगने' इत्यस्य समानार्थकपदं नाट्यांशात् चित्वा लिखत ।<br>(v) 'प्रविशति' इति क्रियापदस्य कर्तृपदं किम्? | 5<br><br>½×2=1<br><br>2×1=2<br><br>½×4=2 |
| | | |
| **13.** | **यथानिर्देशम् उत्तरत -**<br>(i) "अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः" इति वाक्यं कस्मात् ग्रन्थात् गृहीतम्? | 2×2=4 |



Downloaded From : http://www.cbseportal.com Courtesy : CBSE

Downloaded From : http://www.cbseportal.com

| | | |
|---|---|---|
| | कश्च अस्य लेखकः ?<br>(ii) "तर्हि उपालब्धुं वयम् आहूताः" इति वाक्यं कः कं प्रति कथयति?<br>**अथवा**<br>(i) "अशक्तैः बलिनः शत्रोः कर्तव्यं प्रपलायनम्" इति वाक्यं कस्मात् ग्रन्थात् गृहीतं कश्च अस्य लेखकः?<br>(ii) "प्रयोजनम् अन्तरा चाणक्यः स्वप्नेऽपि न चेष्टते" इति वाक्यं कः कं प्रति कथयति? | |
| | | |
| **14.** | **प्रत्येकम् अंशस्य भावार्थत्रयात् समुचितम् उत्तरं चित्वा लिखत -**<br>**(i) स किं सखा साधु न शास्ति योऽधिपम् –**<br>(क) सः कुमित्रं भवति यः राज्ञे समुचितं परामर्शं न ददाति ।<br>(ख) यः राजानं न अनुसरति सः मित्रं भवति ।<br>(ग) यः सत्यम् आचरितुं कथयति सः दुष्टं मित्रं भवति ।<br><br>**(ii) स्तूपः भव्यम् आलोकं विकिरति –**<br>(क) स्तूपः कुत्सितं भावं प्रसारयति ।<br>(ख) स्तूपेन भव्यता न आगच्छति ।<br>(ग) स्तूपः अद्भुतं प्रकाशं प्रसारयति ।<br>**अथवा**<br>**अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत -**<br>**तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता**<br>**एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥**<br>**भावार्थः –**<br>सज्जनानां गेहे कियती अपि (i) .......... भवेत् परं (ii) ...................... वस्तूनि कदापि (iii) ............ न भवन्ति । तेषां गृहे (iv).................. सत्काराय (v) ............ , वासाय गृहभूमिः, पानाय शीतलं (vi)............, सम्भाषणाय च मधुरा (vii) .........सदैव तिष्ठति एव, अत एव अतिथयः तस्मात् गृहात् (viii) ............ न निर्गच्छन्ति ।<br>**मञ्जूषा**<br>जलम्, असत्कृताः, तृणनिर्मितम् आसनम्, दरिद्रता, वाणी, अतिथीनाम्, चत्वारि, न्यूनानि । | 2×2=4<br><br><br><br><br><br><br><br><br><br><br><br><br>½×8=4 |
| | | |
| **15.** | **अधोलिखित- श्लोकयोः प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरूत -**<br>**(क) अशक्तैर्बलिनः शत्रोः कर्त्तव्यं प्रपलायनम् ।**<br>**आश्रितव्योऽथवा दुर्गः नान्या तेषां गतिर्भवेत् ॥**<br>**अन्वयः –**<br>अशक्तैः (i) .............. शत्रोः प्रपलायनं कर्त्तव्यम् (ii) ............... दुर्गः आश्रितव्यः | ½×8= 4 |



Downloaded From : http://www.cbseportal.com Courtesy : CBSE

Downloaded From : http://www.cbseportal.com

| | | |
|---|---|---|
| | (iii) .....................अन्या गतिः न (iv) ..................... ।<br><br>**(ख) निर्वैरा विमुखीभवन्ति सुहृदः स्फीता भवन्त्यापदः ।<br>पापं कर्म च यत् परैरपि कृतं तत्तस्य सम्भाव्यते ॥**<br>**अन्वयः –**<br>निर्वैराः सुहृदः (v) ............ आपदः (vi) ............... भवन्ति, पापं च यत् कर्म (vii) ...............अपि कृतं तत् (viii) ..................... सम्भाव्यते । | |
| | | |
| **16.** | **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -**<br>**'क' स्तम्भः** — **'ख' स्तम्भः**<br>(i) जीवत्यनाथोऽपि — (क) धनविनाशगता विचिन्ता<br>(ii) सत्यं न मे — (ख) निर्घषणच्छेदनतापताडनैः<br>(iii) यथा चतुर्भिः कनकं परीक्ष्यते — (ग) षण्णां ऋतूनाम्<br>(iv) अयमेव कारणम् — (घ) वने विसर्जितः | 1×4=4 |
| | | |
| **17.** | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसंगनुसारं शुद्धम् उत्तरं चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्)**<br>(i) <u>**परमेष्ठिनः**</u> परार्ध संख्या ।<br>(क) विष्णोः (ख) ब्रह्मणः (ग) महेशस्य<br>(ii) <u>**वारिणा**</u> भूमिं सिञ्चन्तु ।<br>(क) जलेन (ख) दुग्धेन (ग) चन्दनेन<br>(iii) अयमेव <u>**वत्सरं**</u> द्वादशसु भागेषु विभनक्ति ।<br>(क) युगम् (ख) वर्षम् (ग) मासः<br>(iv) <u>**शुचि**</u> मनः यद्यस्ति ।<br>(क) शुष्कम् (ख) शोकाकुलम् (ग) पवित्रम्<br>(v) श्रुतं भवद्भिः यत् मत्स्यजीविभिः <u>**अभिहितम्**</u> ।<br>(क) अभिव्यक्तिः (ख) कथितम् (ग) अभिलषितम् | 1×4=4 |
| | | |
| | **खण्डः – घ भाग - ii 10 अङ्काः**<br>**सामान्यसंस्कृतसाहित्यपरिचयः** | |
| | | |
| **18.** | **अधोलिखितेषु कस्यापि एकस्य कवेः परिचयः संस्कृतेन लेख्यः -**<br>**भासः, कालिदासः, भर्तृहरिः**<br>**अथवा**<br>**अ. मञ्जूषाप्रदत्तपदानां सहायतया अधोलिखतवाक्येषु रिक्तस्थानपूर्तिं कुरुत -**<br>(i) नाटकस्य आरम्भे .......................... भवति । | 5<br><br><br><br>½×10=5 |



Downloaded From : http://www.cbseportal.com Courtesy : CBSE

Downloaded From : http://www.cbseportal.com

(ii) ........................... स्वरलययुक्तं भवति ।

(iii) ........................... महाकविकालिदासस्य कृतिः ।

(iv) चारुदत्तस्य लेखकः ........................... अस्ति ।

(v) गद्यपद्ययुक्तं ........................... कथ्यते ।

(vi) गद्ये ........................... प्रयोगः भवति ।

(vii) नाटके ........................... पात्रं विदूषकः कथ्यते ।

(viii) गद्यं कवीनां ........................... वदन्ति ।

(i×) प्रकरणे ........................... अङ्काः भवन्ति ।

(×) विशाखदत्तः ........................... रचितवान् ।

**मञ्जूषा**

| |
|---|
| मुद्राराक्षसम्, पद्यकाव्यम्, महाकविः भासः, दश, कुमारसम्भवम्, चम्पूकाव्यम्, निकषम्, नान्दी, हास्योत्पादकम्, दीर्घसमासानाम् । |

**(क) महाकाव्यस्य गीतिकाव्यस्य वा पञ्च वैशिष्ट्यानि लेख्यानि ।** 5

------------------------OoO-------------------------



Downloaded From : http://www.cbseportal.com Courtesy : CBSE